# सीरदेवकृतबृहत्परिभाषावृत्तेः द्वितीयाध्यायादापरिसमाप्ति समीक्षात्मकमध्ययनम्

*sīradevakṛtabṛhatparibhāṣāvṛtteḥ dvitīyādhyāyādāparisamāpti samīkṣātmakamadhyayanam*

A Critical Study of Śīradeva"s Bṛhatparibhāṣāvṛtti from the Second Chapter to the End.

रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानात् संस्कृते विद्यावारिध्युपाधये समर्प्यमाणशोधप्रबन्धः

Dissertation submitted for the degree of PhD. (Sanskrit) to

Ramakrishna Mission Vivekananda Educational and Research Institute


मार्गदर्शकः

**डॉ. सुखदेवभट्टः**

सहकार्यध्यापकः

संस्कृतदर्शनविभागः

अनुसन्धाता

**अमितकुमारः साउ**

शोधच्छात्रः

संस्कृतदर्शनविभागः



रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानम्

(मानितविश्वविद्यालयः)

बेलुडमठः, हावडा – ७११२०२, पश्चिमवङ्गः, शिक्षावर्षम् - २०२०-२०२५

## ॥सीरदेवकृतबृहत्परिभाषावृत्तेः द्वितीयाध्यायादापरिसमाप्ति समीक्षात्मकमध्ययनम्॥

### ॥शोधसारः॥

अमितकुमारः साउ।

विद्यावारिधिछात्रः

संस्कृत-दर्शनविभागः।

रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोधसंस्थानम्।

बेलुडमठम्, हावडा, पश्चिमबङ्गः -७११२०२।

कूटशब्दाः – परिभाषा, सीरदेवः, परिभाषार्थः, परिभाषाफलम्, समीक्षा

स्वजीवनस्य लक्ष्यसाधनाय आरुह्यमाणे मार्गे कदाचिन्मध्यमार्गे द्वौ पन्थानौ युगपदुपस्थितौ भवतः तदा वयं लक्ष्यनाशाय शङ्कामहे तदानीमेव कश्चन सज्जनः सद्गुरुर्वा यथा अस्माकं दिङ्निर्देशं करोति तथैव व्याकरणे क्वचिदेकस्मिन्नेव लक्ष्ये एकाधिकानि लक्षणानि समुपतिष्ठन्ति। एकस्मिन् लक्ष्ये एककालमेकस्यैव लक्षणस्य प्रवृत्तियोग्यत्वाद् अनियमः भवति। यत्र च अनियमो भवति तत्र नियम उपतिष्ठते।तस्मिन्नेव अनियमे नियमं करोति परिभाषा। अतः महर्षिर्दयानन्दः परिभषासंज्ञां परिभाषयनवोचत् - “परितो व्यापृतां भाषां परिभाषा प्रचक्षते”। व्याकरणपरिभाषाशास्त्रं सुविशालं सुविस्तृतञ्च वर्तते। नागेशेन विरचितात् परिभाषेन्दुशेखरात् प्रागपि पञ्चदशभिराचार्यैः परिभाषापाठः कृतः। तेषु सर्वेष्वपि परिभाषाग्रन्थेषु व्याडिकृतः परिभाषाग्रन्थः प्राचीनतम इति विद्वांसः मन्वते। अनुपुरुषोत्तमदेवं केभ्यश्चिद् वर्षेभ्यः परं सीरदेवेन परिभाषाणामुपरि ‘वृहत्परिभाषावृत्तिः’ इत्यभिधेयो ग्रन्थो व्यरच्यत। पुरुषोत्तमदेवेन ललिताख्यलघुपरिभाषावृत्तिविरचनानन्तरं सीरदेवेन वृहत्परिभाषाख्यग्रन्थविरचनात् परिभाषाणां महिमा वर्धितः। अस्यायं विशेषः यद् अयं परिभाषोपन्यासविषये स्वपूर्ववर्त्याचार्यान् नानुससार। प्रायस्तैः परिलक्षितम् यत् तत्पूर्ववर्तिभिराचार्यैः याः परिभाषाः पठिताः ताः सर्वाः महाभाष्ये उपलब्धाः। अतः भाष्यकारेण पाणिनिमनुसृत्य अष्टाध्याय्यनुसारं यथासूत्रं व्याख्यानावसरे या परिभाषा आश्रिता, अनेनाऽपि स एव क्रम आश्रितः। अतस्तेन यथाभाष्यम् अनुसृत्य प्रथमाध्यायस्य प्रथमपादस्य नाम वृद्धिपाद इति कृतः। एवञ्च सीरदेवेन अष्टाध्यायीक्रमानुसारं परिभाषाणां क्रमो निर्धारितः, तथा तेन स्वग्रन्थे अष्टावध्यायाः व्यभज्यन्त तस्मिन् प्रथमाध्यायस्य ‘वृद्धिपादः’, ‘गाङ्कुटादिपादः’, ‘भूपादः’, ‘कारकपादः’ – इत्यादिना नाम्ना अध्यायविभागः कृतः। द्वितीयाऽध्यायेऽपि परिभाषाणां समर्थपूर्वापराभिहित्वादिना नाम्ना पादविभाजनं कृतम्। एवञ्च आचतुर्थाध्यायं तत्र प्रत्यध्यायं चत्वारः पादा अर्थादाहत्य षोडशपादाः। तथा पञ्चमाध्याये द्वौ पादौ, षष्ठे त्रयः पादाः, सप्तमे चत्वारः पादाः, तथा अष्टमे एक एव पादः विलसति। आहत्य अष्टसु

अध्यायेषु षड्विंशतिः पादाः वर्तन्ते। अस्मिन् ग्रन्थे नवनवतिः परिभाषाः ज्ञापकसिद्धाः, शतमारभ्य त्रिंशदधिकैकशतपर्यन्तं परिभाषाः च न्यायमूलाः वर्तन्ते। सीरदेवाचार्येण प्राचीनपरिभाषाग्रन्थेषु उपलब्धाः महाभाष्येऽनुपलब्धपरिभाषाः च पर्यालोच्यन्त। 'गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः', 'कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययः', 'उपपदविभक्तेः कारविभक्तिर्बलीयसी', 'ज्ञापकसिद्धं न सर्वत्र' – प्रभृतयो न्यायसिद्धाः परिभाषाः अत्र विराजन्ते। समग्रे पूर्वभारते अस्य परिभाषाग्रन्थः चतुःशतं वर्षं यावत् प्रचालि, अष्टादशशताव्द्यां नागेशविरचितस्य परिभाषेन्दुशेखरस्य प्रचारानन्तरमस्याः परिभाषावृत्तेरुपादेयता न्यूना अजनिष्ट। परन्तु अद्यापि परिभाषेन्दुशेखरपठनकाले सीरदेवकृतवृहत्परिभाषवृत्तिः स्मर्यते, यतो हि नागेशेन सीरदेवस्य खण्डनपूर्वकं स्वमतमुपस्थापितम्।

'सीरदेवकृतबृहत्परिभाषावृत्तेः द्वितीयाध्यायादापरिसमाप्ति समीक्षात्मकमध्ययनम्' इति शीर्षकमाश्रित्य मया शोधः कृतः। अस्मिन् शोधप्रबन्धे अहं सीरदेवकृतबृहत्परिभाषावृत्तौ द्वितीयाध्यायादारभ्य विद्यमानानां परिभाषाणां प्रतिपरिभाषं यथासीरदेवं साधितार्थं, ज्ञापकं, प्रयोजनं च यथामति पर्यालोचयम्।प्रतिपरिभाषमेतान् त्रीन् बिन्दून् पर्यालोच्य अन्ते परिभाषायाः समीक्षा कृता। समीक्षायाम् सीरदेवेन पठिताः परिभाषाः व्याडिहरिभास्करपुरुषोत्तमदेवनीलकण्ठादीनां पाठेषु प्राप्यन्ते न वा, तैः परिभाषायाः किं ज्ञापकं स्वीकृतम्, तस्मिन् स्वीकारे कुत्र दोषः, कुत्र सर्वेषां परिभाषाकाराणां साम्यं विद्यते, कुत्र च वैषम्यं सर्वमहम् आलोचयम्। मम अस्मिन् शोधप्रबन्धे पञ्च अध्यायाः सन्ति।

अधः द्वयोः परिभाषयोः समीक्षामुदाहरणत्वेन उपस्थापयामि –

**१. क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते –**

**परिभाषार्थः –**

कस्यचिद्विधेः अवश्यप्राप्तौ विध्यन्तरस्यारम्भणम् अपवाद इत्युच्यते। विशेषशास्त्रोद्देश्यविशेषधर्मावच्छिन्नोद्देश्यताकशास्त्रत्वमेव अपवादस्य बाधकत्वे कारणम्। सर्वथा अनवकाशत्वादेव बाधकत्वम् इति न निर्णेयम्। अत्र परिभाषायामुक्तः अपवादशब्दः लक्षणया बाधकार्थं बोधयति। क्वचिदपवादविषयेऽपि उत्सर्गः प्रवर्तते इति परिभाषार्थः। अपवादशास्त्रप्रवृत्यनन्तरं यदि उत्सर्गशास्त्रस्य प्राप्तियोग्यता तदा तदपि प्रवर्तते इत्यनया परिभाषया प्रतिपाद्यते।

**परिभाषाज्ञापकम् –**

कटं कारको व्रजति इत्यत्र अकस्य भविष्यति काले विहितं "अकेनोर्भविष्यदाधमर्ण्ययोः" (अ. २.३.७०) इत्यनेन षष्ठीनिषेधवचनम् अस्याः परिभाषाया ज्ञापकम्। "अण् कर्मणि च" (अ.३.३.१२) इत्यनेन कर्मणि उपपदे क्रियार्थायां क्रियायां अण् प्रत्ययो भवति। इदं च सूत्रं

"तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्" (अ.३.३.१०) इत्युत्सर्गसूत्रस्य अपवादसूत्रम्। पूर्वस्मिन् उदाहरणे कर्मणि उपपदे कारके इत्यत्र अकः उत्पत्तिस्तदैव भवति यदा कृधातोः ण्वुल् प्रत्ययो भवति। ण्वुलि सत्येव ण्वुलः वकारस्य अकादेशो भवति। तत्तदैव भवति यदा अपवादं प्रबाध्य उतसर्गसूत्रं तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् प्रवर्तते। तस्य प्रवृत्यभावे तु पूर्वोक्तः षष्ठीनिषेधो न सम्भविष्यति। अतः स निषेधो ज्ञापयति क्वचिदपवादविषयेप्युत्सर्गोऽभिनिविशते। ननु "वासरूपोऽस्त्रियामि"त्यनेन अपवादविषये ण्वुल् सिद्ध एव। अत तज्ज्ञापकं भवितुं नार्हति। इति चेन्न क्रियायां क्रियार्थायां वाऽसरूपो विधिर्न भवति। किं ज्ञापकमिति चेदुक्तमाचार्येण "ण्वुल्तृचौ" (अ.३.१.१३३) इत्यनेन ण्वुलि सिद्धे पुनः "तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्" (अ.३.३.१०) इति "लृट् शेषे च" (अ.३.३.१३) अस्मिन् विषये ण्वुलः विधानेन ज्ञातुं शक्यते। अन्यथा वासरूपशास्त्रेणैव यदि लृड्विषये ण्वुलः विधानं समभविष्यत् तर्हि पुनस्तन्नाकरिष्यत्। कृतं च बोधयति क्रियायां क्रियार्थायां वासरूपविधिर्न भवति।

**परिभाषाफलम् –**

प्रत्ययविधायके उत्सर्गापवादयोर्विषये इयं परिभाषा प्रवर्तते इति सीरदेवस्य मतम्। अत एव काञ्चनी इति रूपं सिद्ध्यति। काञ्चनस्य विकारः इत्यर्थे तस्य विकारः इत्यनेन अण्प्रत्यये आदिवृद्धौ यस्येति च इति लोपे ङीपि काञ्चनी इति रूपं सिद्ध्यति। तस्य विकारः इत्यर्थे विहितः अण् उत्सर्गशास्त्रम्, तस्यापवादः "नित्यं वृद्धशरादिभ्यः" (अ.४.३.१४४) इति मयड्प्रत्ययो विधायकं सूत्रम्। तदा अनया परिभाषया क्वचिदपवादविषयेऽपि उत्सर्गस्य प्रवृत्तेः अणः प्रवृत्या पूर्वोक्तं रूपं सिद्ध्यति।

**समीक्षा –**

इयं परिभाषा इत्थं स्वरूपेण पुरषोत्तमदेवनीलकण्ठहरिभास्करैः पठितम्। व्याडिशाकटायनकातन्त्रभोजहेमचन्द्राणां पाठेषु पाठभेदो विद्यते।[1] अस्याः परिभाषाया अर्थविषये मतवैसादृश्यं विद्यते। सीरदेवेन योऽर्थ आश्रितः पुरुषोत्तमदेवनीलकण्ठहरिभास्करैश्च स एव आश्रितः। तैरपवादस्यापवादार्थं स्वीकृत्य अपवादविषये उत्सर्गो भवति इत्यर्थः प्रतिपादितः। नीलकण्ठमते अपवादविषये अपवादस्येतरेण निषेधेऽपि उत्सर्गो भवति। इममर्थं कैयटाचार्योऽपि स्व्यकरोत्। नागेशाचार्यमते अस्मिन्नपवादशब्दो बाधकपरोऽर्थात् सर्वथा निरवकाशः, तन्मतं च सप्रमाणं सहेतु सविस्तारं प्रत्यपादयत्। परिभाषाया हेतौ प्रवृत्तौ च मतभेदो विद्यते। व्याडिमते इयं ज्ञापकसिद्धा "शेषे विभाषाऽकखादावषान्त उपदेशे" (अ.८.४.१८) इत्यस्मिन् उपदेशे पदग्रहणमस्याः ज्ञापकम्। सीरदेवेन यज्ज्ञापकं स्वीकृतं तदेव ज्ञापकं पुरुषोत्तमदेवहरिभास्कराभ्यां प्रतिपादितम्। नीलकण्ठाचार्यदृष्ट्या "तौ सत्" (अ.३.२.१२७) इति

---

[1] **"अपवादविषयेऽप्युत्सर्गोऽभिनिविशते" – परिभाषासंग्रहः।**

निर्देशोऽस्याः ज्ञापकम्। तन्मते अस्याः कारणादेव रामावित्यस्मिन् वृद्ध्यपवादभूतस्य पूर्वसवर्णदीर्घस्य "नादिचि"(अ.६.१.१०४) इति प्रतिषेधेऽपि वृद्धिर्भवति। नागेशाचार्यस्य मते नेयं ज्ञापकसिद्धा अपि तु युक्तिसिद्धा अत उक्तं लोकेऽपि ब्राह्मणाः भोज्यन्तां माठरकौण्डिन्यौ परिवेविषाताम् इत्यस्मिन् परिवेषणोत्तरं भोजनस्य दृष्टत्वात् तद्वदत्रापि बाधकप्रवृत्त्युत्तरं यदि उत्सर्गस्य प्राप्तिस्तदा भवति। अतस्तैः ज्ञापकं नोदितम्, तैः प्राचीनानां मतान्यपि खण्डितानि। आचार्यः स्वस्य नवीनाभिमतं प्रतिष्ठापितवान्। केषुचित् स्थलेषु कैयटाचार्यं खण्डितवान्। अन्ते च अपवादविषये विशिष्टान् सिद्धान्तान् प्रतिपादितवान्।

**२. सांप्रतिकाभावे भूतपूर्वगतिः –**

**परिभाषार्थः –**

सम्प्रति भवः साम्प्रतिकः, पूर्वं भूतः भूतपूर्वः इति। साम्प्रतिकस्य वर्तमानस्य विशेषणस्याभावे भूतपूर्वस्योपलक्षणस्य गतिः आश्रयणं भवतीति परिभाषार्थः। वर्तमानस्य धर्मस्याऽभावेऽपि पूर्वं स्थितस्य धर्मस्याश्रयणेन लक्ष्यं साध्यते।

**परिभाषाज्ञापकम् –**

"अचो यत्" (अ. ३.१.९७) इत्यस्मिन् सूत्रे अज्ग्रहणमिमां परिभाषां ज्ञापयति। अनेन सूत्रेण अजन्ताद्धातोर्यद्विधीयते। "ऋहलोर्ण्यत्" (अ. ३.१.१२४) हलन्तात् ण्यत् विवक्षति, अतस्तत्र हल उपादानादेव हलो ण्यति सिद्धे पारिशेष्याद् अजन्तादेव यत् सेत्स्यति तस्मात् पृथगच उपादानं व्यर्थं, तच्च व्यर्थीभूय इमां परिभाषां ज्ञापयति। ज्ञापितायां त्वस्यां धित्स्यमित्यत्र डुधाञ्-धारणपोषणयोरित्यस्माद्धातोः सनि द्वित्वे ध धा स इति स्थिते "सनि मीमाघुरभलभशकपतपदामच इस्" (अ. ७.४.५४) इत्यमुना सनि परे धा-इत्यस्य आकारस्य स्थाने इसादेशे धा धिस् स इति स्थिते अभ्यासस्य धा-इत्यस्य "अत्र लोपोऽभ्यासस्य" (अ. ७.४.५८) इत्यनेन लोपे धिस् स इति स्थिते सनः अकारस्य आर्धधातुके विषये "अतो लोपः" (अ. ६.४.४८) इति लोपे धिस् स् इति जाते अनया परिभाषया स-कारस्य भूतपूर्वमज्त्वं विज्ञायात्र "अचो यत्" (अ. ३.१.९७) इत्यनेन यति धिसः सकारस्य तादेशे प्रक्रियया धित्स्यमितीष्टं सिद्ध्यति। अतो ज्ञापकसूत्रे अच्पदं स्वांशे चरितार्थम्।

**परिभाषाफलम् –**

तत्फलं तु आछिँ आयामे इत्यस्माद्धातोः इदित्त्वात् "इदितो नुम् धातोः" (अ. ७.१.५८) इत्यनेन कर्तरि लिटि प्रथमपुरषैकवचने तिपि, तिपो णलादेशे द्वित्वे हलादिशेषे अभ्यासस्याकारस्य ह्रस्वे अ आन्छ् अ इति स्थिते अत्र "अत आदेः" (अ. ७.४.७०) इत्यनेन अभ्यासस्य आदेर्ह्रस्वस्याकारस्य दीर्घं प्राप्नोति किन्त्वत्रानया परिभाषया अकारस्य भूतपूर्वदीर्घत्वमतिदिश्य अत्र सूत्रे अतः तपरकरणात्तेन सूत्रेण दीर्घो न भवति अपि तु "अकः सवर्णे दीर्घः" (अ. ६.१.१०१)

इत्यनेन सूत्रेण पूर्वपरयोरेकदीर्घादेशो भवति , ततश्च नकारस्य अनुस्वारे परसर्वणे आञ्छेति इष्टं रूपं सिद्ध्यति। तथैव आच्छ आच्छतुः आच्छुरित्येतेषु "तस्मान्नुड् द्विहलः" (अ. ७.४.७१) इत्यनेन अभ्यासस्य दिर्घे जाते द्विहल्विशिष्टस्य आन्छ्-इतस्याङ्गस्य नुडागमे प्राप्ते भूतपूर्वह्रस्वत्वं स्वीकृत्य तत्र दीर्घाभावान्नुडागमं प्रबाध्य इष्टरूपसिद्धिः सम्पादिता।

**समीक्षा –**

पुरुषोत्तमदेवनीलकण्ठहरिभास्करनागेशाचार्याणां पाठे परिभाषायाः स्वरूपमिदमेव विद्यते। व्याडिशाकटायनयोः पाठभेदः प्राप्यते।[2] "भूतपूर्वकस्तदुपचारः" – अयं पाठः कातन्त्रकृता हेमचन्द्राचार्येण भोजेन च कृतः। परिभाषायाः ज्ञापके मतभेदो विद्यते। व्याडिनये "ओक उचः के" (अ.७.३.६४) इत्यस्मिन् सूत्रे उच इति पदोपादनमस्याः ज्ञापकमिति। पुरुषोत्तमदेवसीरदेवनीलकण्ठहरिभास्करैश्च "अचो यत्" इत्यस्मिन् अच्ग्रहणं ज्ञापकमिति उपापाद्यत। किन्तु नागेशाचार्यस्य मते इयं परिभाषा न ज्ञापकसिद्धा अपि तु न्यायसिद्धा। तन्नये यथा देवदत्तेन स्वगृहे विक्रिते अन्येन क्रीते सत्यपि लोके एतत् देवदत्तस्य गृहमिति प्रयोगः दृश्यते तथैवात्र शास्त्रेषु लक्ष्यसाधनाय भूतपूर्वं धर्ममाश्रित्य शास्त्रीयं कार्यं भवति। एवञ्च सीरदेवैर्नाङ्गीकृतमपि न्यायसिद्धत्वं नागेशभट्टैः समर्थ्यते इति बोध्यम्। एवञ्च प्राचीनरीत्या एषा परिभाषा ज्ञापकसिद्धा, नागेभट्टरीत्या न्यायसिद्धा एव इति बोध्यम् । किन्तु द्वयोः सिद्धान्तं पर्यालोच्य वक्तुं शक्नुमः इयं परिभाषा लोकन्यायेन सह ज्ञापकसिद्धापि अतोऽस्य ज्ञापकसिद्धत्वमपि नागेशाचार्येण स्वीकर्तव्यम्। सर्वे प्राचार्याः अस्याः अर्थमुपन्यस्तवन्तः किन्तु नागेशाचार्यो न कृतवान्। नागेशाचार्येण अतीव संक्षेपेण परिभाषायाः व्याख्यानं प्रस्तुतम्। सर्वैः अस्याः द्वित्राण्युदाहरणानि प्रोक्तानि किन्तु नागेशाचार्येणैकमेवोपदाहरणं प्रस्तुतम्। अत्रेदं बोध्यव्यं साम्प्रतिकेण प्राप्तेन सूत्रेण इष्टसिद्धिर्न भवति चेदेवेयं परिभाषा प्रवर्तते अत एव हे गौरित्यत्र गोः सम्बुधौ सौ परे णिद्धवद्भावे वृद्धौ इष्टरूपसिद्धिर्भवति अन्यथा परिभाषायां साम्प्रतिकपदग्रहणाभावादेव भूतपूर्वैङन्तात् "एङ्ह्रस्वात्संबुद्धेः" (अ.६.२.६९) इति सम्बुद्धिलोपः स्यात्।

*****

[2] **"भूतपूर्वगतिरिह शास्त्रे" व्या०पा०, परि०सं० - १४, शा०पा०, परि०सं० – १८।**